# Contents


Pages

Introduction ........ S 1

§1 Author ........ S 3
§2 *Gaṇitamañjarī* ........ S 3
§3 Contents of the *Gaṇitamañjarī* ........ S 5
§4 Three manuscripts used for the present edition ........ S 8
§5 Relationship of the manuscripts ........ S 9
§6 Phonetic and orthographic peculiarities of the manuscipts ........ S 10
§7 Notation in the manuscripts ........ S 11
§8 Figures in the manuscripts ........ S 13
§9 Conventions and signs in the present edition ........ S 13

गणितमञ्जरी ........ S 15

१ परिभाषा ........ S 17
२ परिकर्माष्टकानि
१ अभिन्नपरिकर्माष्टकम् ........ S 18
२ भिन्नपरिकर्माष्टकम् ........ S 22
३ शून्यपरिकर्माष्टकम् ........ S 25
३ जातिगणः ........ S 26
४ प्रकीर्णकजातिः ........ S 39
५ व्यवहाराः
१ मिश्रकव्यवहारः ........ S 45
२ श्रेढीव्यवहारः ........ S 60
३ क्षेत्रव्यवहारः ........ S 66

Appendices ........ S 105

A: Figures in the Manuscripts ........ S 107
B: Interpolation in Manuscript E ........ S 113
C: Index to Meters ........ S 115
D: Index to Subjects ........ S 117

# Abbreviations

Sanskrit texts:

| | |
|---|---|
| AB | Āryabhaṭa I, *Āryabhaṭīya* |
| BG | Bhāskara II, *Bījagaṇita* |
| GM | Gaṇeśa, *Gaṇitamañajarī* |
| L | Bhāskara II, *Līlāvatī* |
| PG | Śrīdhara, *Pāṭīgaṇita* |
| Tr | Śrīdhara, *Triśatikā* |

Other works:

| | |
|---|---|
| CESS | David Pingree, *Census of the Exact Sciences in Sanskrit* |
| JAML | David Pingree, *Jyotiḥśāstra: Astral and Mathematical Literature* |

∀विश्वंभराङ्गपवना वदनं खपक्षा वामो भुजः शरयमा अपरोऽङ्कपक्षाः । E39b
लम्बद्वयं च खयमप्रममत्र मित्र क्षेत्रे प्रचक्ष्व सुमते विमलं फलं मे॥ २२५ ॥

न्यासः ।




[चित्र १७ ][1]

अत्र सर्वभुजैक्यखण्डम् ६५ । इदं चतुःस्थितम् ६५ । ६५ । ६५ । ६५ ।[2] स्वकीयभुजै रहितम् ९ ।
४० । ४५ । ३६ ।[3] एतद्घातः ५८३२०० ।[4] अस्य मूलं किं∀चिन्न्यूनं चतुःषष्ठ्यधिकसप्तशतमितम् J84a
७६४ ।[5] इदमत्र क्षेत्रे न वास्तवं फलम् ।[6] ‘लम्बाहतं भूमुखयोगखण्डम्’ (GM 240c) इति वक्ष्यमाणप्रकारेण जातं स्फुटं फलम् ७६०॥ २२५ .१ ॥[7]

उक्तप्रकारेण त्रिभुजक्षेत्रे फलं यदि साध्यते तदा स्फुटमेव भवति। यथा पूर्वोक्तत्रिभुजस्य।
न्यासः ।[8]




[चित्र १८ ]

अत्र चतुःस्थितं सर्वभुजैक्यखण्डमिदम् ३४ । ३४ । ३४ । ३४ । स्वभुजै रहितम् १७ । ९ । ८ । ३४ ।[9] एतदभिहतिः ४१६१६ ।[10] अस्या मूलं जातं क्षेत्रफलं पूर्वानीतफलतुल्यमेव २०४॥ २२५ .२ ॥[11]

करणसूत्रं वृत्तषट्कम्॥ २२६ .० ॥[12]

---

[1] ∅ J ] १५ , २० , १ (for १५ , २१) (for the base segments) E. [2] इदं J ] ∅ E. [3] ३६ J ] ४६ E. [4] ए E ] तेन ए J. [5] शतमितं ७६४ J ] श ७६४ तं E. [6] मत्र J ] मत्रं E. [7] टं J ] ट E. [8] न्यासः J ] न्यासः न्यासः E(first ‘nyāsaḥ’ crossed out). [9] स्व J ] स्वस्व E. [10] तदभिह E ] तेभिर्हं J. [11] स्या J ] स्य E; क्षेत्रफलं J ] ∅ E. E skips the passage beginning with this ‘204’ and ending with ‘karṇau’ of GM 226b and, after ‘karṇaḥ’ of 226d, writes down part of that passage, beginning with the ‘204’ and ending with ‘bhuje’ of ‘bhujeṣu’ of 226a, together with the delimiter ‘+’ at both ends, omitting ‘ṣu teṣveva karṇau’ (see the footnote for 226ab). The correct place for it (after ‘tulyameva’) is indicated by a wedge mark ‘∨’. [12] वृत्त J ] श्लोक E.

J84b क्षेत्रे चतुःसंख्यभुजे भुजेषु तेष्वेव कर्णौ ∀बहुधा भवेताम्।[1]
विनैककर्णप्रविकल्पनेन द्वितीयकर्णः कथमुच्यतेऽत्र॥ २२६॥[2]
कर्णान्यथाभावविभावनेन संभाव्यते क्षेत्रफलेऽन्यथात्वम्।[3]
आद्यैः सुखार्थं नियतौ हि कर्णौ संसाधितौ तावितरत्र न स्तः॥ २२७॥[4]
E40a ∀इष्टा श्रुतिः सर्वचतुर्भुजेषु भूमिः प्रकल्प्या त्रिभुजद्वयोऽपि।[5]
ततः प्रसाध्या अवधावलम्बा अथैकदिक्स्थावधयोर्वियोगः॥ २२८॥[6]
वर्गीकृतो लम्बकयोगवर्गसमन्वितस्तत्पदमन्यकर्णः।[7]
यथोक्तवत् त्र्यस्रफलद्वयैक्यं चतुर्भुजक्षेत्रफलं निरुक्तम्॥ २२९॥[8]
J85a चतुर्मितास्रे समसंज्ञके वा वर्गीकृतेष्टश्र∀वणोनितायाः।
युगघ्नदोर्वर्गमितेः पदं वा द्वितीयकर्णः समुदीरितोऽयम्॥ २३०॥[9]
कर्णद्वयस्याभिहतिर्द्विभक्तामलं फलं तुल्यचतुर्भुजे वा।[10]
तथायते तुल्यचतुर्भुजे वा समश्रुतौ कोटिभुजाभिघातः॥ २३१॥

एकान्तरकोणावाक्रम्यान्तःसंकोच्यमानं चतुर्भुजं कराकलितकोणसंलग्नं कर्णं संकोचयति तदपरं परिवर्धयति।[11] तेनैकाभिमतकर्णकल्पनापरित्यागेन द्वितीयकर्णसाधनं कर्तुं न युज्यत
J85b इति 'भुजेषु तेष्वेव कर्णौ बहुधा भवेताम्' (GM 226ab) इत्यादिसूत्रस्याभिप्रायः।[12] कर्णयोर∀नि-यतत्वदर्शनेन क्षेत्रफलेऽपि नियतत्वाभावोऽवगम्यते। एवं कर्णयोरनियतत्वे सत्यपि नियतकर्ण-साधनमाद्यैरुक्तं तत्सुखार्थमेव। शेषगणितक्रियाप्रतिपादकसूत्रार्थः सुगम एव॥ २३१.१॥[13]

अत्रोद्देशकः॥ २३२.०॥

E40b नखसमानचतुर्भुजके तथा तिथिनखोन्मितकोटिभुजाय∀ते।
वद फलं विमलं मृगलोचने तव यदा गणिते वितता मतिः॥ २३२॥[14]

अपि च॥ २३३.०॥

नखेन्दुतुल्या धरणी समीरत्रितुल्यमास्यं शरसप्ततुल्यः।[15]
सव्यो भुजोऽन्यः शतसंमितोऽत्र कर्णौ फलं चापि वदाशु मित्र॥ २३३॥[16]

J86a अत्र प्रथमोक्त∀समचतुर्भुजस्य न्यासः।

---

[1] षु···र्णौ J ] ∅ E. [2] नैक J ] नैव E. [3] ने J ] वे E. [4] र E ] रा J. [5] जे E ] ∅ J('je' added in margin); मिः E ] मि J; योऽपि ] येपि JE. [6] क्स्थ E ] स्थ J. [7] न्य J ] त्र E. Here and in 230b, the letter 'rgī' in E has an irregular form, which looks like 'ga' + {a short-legged 'ī' and a numeral '2' below it}. [8] लं J ] ली E. [9] र्ग J ] ग E. [10] द्व E ] स्द्व J. [11] र्णं J ] र्ण E; र्ध E ] र्द्धं J. [12] नयु J ] यु E. [13] प्र J ] प्रा E. [14] तता J ] मला E. [15] रत्रि J ] राग्नि E. [16] न्यः J ] न्यशः E; त J ] र E.




[चित्र १९]

‘दोःकोटिवर्गयुतिमूलमितोऽत्र कर्ण’ (GM 177a) इतिसूत्रक्रमेण जातो भुजकोटिवर्गयोगः ८००। अस्यासन्नमूलग्रहणेन जातं समकर्णप्रमाणम्[1] २८ २ ७ [2] भुजकोटिघात एव क्षेत्रफलम् ४००॥ २३३.१॥

अथवात्र चतुर्विंशतिमितः सव्यभुजाग्राद्दक्षिणभुजमूलगामी कर्णः कल्पितः।[3] तथा क्षेत्रन्यासः।[4]




[चित्र २०][5]

अत्र ‘भुजान्तरैक्याभिहतिर्’ (GM 218a) इत्यादिना त्रिभुजद्वयेऽपि लम्बाबाधाः प्रसाध्य तदनन्तरम् ‘अथैकदिक्स्थावधयोर्वियोग’ (GM 228d) इत्या∀दिना सूत्रेण द्वितीयकर्णः साधितः J86b
३२।[6] ‘भूलम्बयोराहतिरश्विभक्ता’ (GM 219c) इति जातं त्रिभुजद्वयेऽपि फलं तुल्यमेव १९२। १९२।[7] एतदैक्यं जातं सकलक्षेत्रफलम् ३८४॥ २३३.२॥[8]

अथवा भुजवर्गः ४००। चतुर्गुणः १६००। कल्पितकर्णवर्गेणानेन ५७६ हीनः १०२४। अस्य मूलं जातो द्वितीयकर्णः ३२।[9] कर्णद्वयस्यास्य ३२। २४ अभि∀हतिः ७६८। दलिता जातं E41a
क्षेत्रफलं तदेव ३८४॥ २३३.३॥

अथोक्तायतक्षेत्रस्य न्यासः।[10]

---

[1] न्न J ] न्म E; तं E ] त J. [2] २८ २ ७ ] २८ १७ JE. [3] ग्रा J ] या E. [4] क्षेत्र J ] ∅ E. [5] The longer diagonal E ] half the longer diagonal J; २४ ] ∅ J, ३२ E; ∅ (for half the longer diagonal) ] १६ J, १६ १६ E. [6] भि J ] ∅ E. [7] श्वि J ] श्व E. [8] एतदै J ] उभयै E. [9] तीय J ] तीयः E. [10] क्षेत्र J ] ∅ E; सः J ] स E.




[चित्र २१][1]

J87a अत्र भुजकोटिवर्गयोगः ६२५ ।[2] अस्य मूलं समकर्णप्रमाणम् २५ । भुजकोटिघातः ∀क्षेत्र-फलम् ३००॥ २३३.४ ॥

अथवा पञ्चविंशतिमितं कर्णमेव भूमिं प्रकल्प्य त्रिभुजद्वयेऽपि 'भुजान्तरैक्याभिहतिर्' (GM 218a) इत्यादिना साधिता आबाधावलम्बाः ।[3] तथा क्षेत्रदर्शनम् ।




[चित्र २२][4]

अत्रैकदिग्गताबाधयोरन्तरम् ७ ।[5] अस्य वर्गः ४९ । लम्बयोगवर्गेणानेन ५७६ युक्तः ६२५ ।[6] अस्य मूलं जातो द्वितीयकर्णः पूर्वसम एव २५ ।[7] 'भूलम्बयोराहतिर्' (GM 219c) इत्यादिना जातं त्रिभुजद्वये तुल्यं फलम् १५० । १५० । एतदैक्यं जातं सकलायतक्षेत्रफलं तदेव ३००॥ २३३.५ ॥

J87b यद्यत्र पञ्चविं∀शतेरून एकः कर्णः कल्पितो भवति तदा 'इष्टा श्रुतिः सर्वचतुर्भुजेषु भूमिर्' (GM 228ab) इत्यादिसूत्रेण द्वितीयकर्णः साध्यः ।[8] त्रिभुजद्वयफलैक्यं क्षेत्रफलं वक्तव्यम्॥ २३३.६ ॥

अथ पूर्वोक्तविषमचतुर्भुजस्य न्यासः ।[9]




[चित्र २३][10]

---

[1] ∅ E ] two diagonals J. [2] गः E ] ग J. [3] पंच J ] पंचमि E; तंकर्णमेव J ] तमेवकर्णं E; रि J ] द्विभक्ते E. [4] ९ (left) E ] ९ लं J; १६ (left) E ] १६ लं J. [5] ग्गता J ] गा E. [6] ग E ] गः २५ J. [7] तीय J ] तीयः E. [8] ऊनएकः J ] ऊनः E; कल्पितो E ] साध्यल्पतो J(corrected to 'kalpito'); सू ] ण J(corrected to 'sū'), नासू E; तीय J ] तीयः E. [9] पूर्वो E ] प्रथमो J. [10] ११७ J ] ∅ E.

अत्र सव्यभुजाग्राद्दक्षिणभुजमूलगामिनं कर्णं सप्तदशोत्तरशत११७मितं प्रकल्प्य तमेव त्रिभुज-द्वयेऽपि भूमिं ∀कृत्वा 'भुजान्तरैक्याभिहतिर्' (GM 218a) इत्यादिना साधिता आबाधावलम्बाः।[1] E41b
लघुत्रिभुज आबाधे २१। ९६ लम्बः २८।[2] महति त्रिभुज आबाधे २१। ९६ लम्बः ७२।[3] तथा क्षेत्रन्यासः।[4] ∀ J88a




[चित्र २४][5]

अथैकदिग्गताबाधयोरन्तरम् ०।[6] वर्गीकृतम् ०। लम्बयोग१००वर्गेणानेन १०००० युक्तं जातम् १००००।[7] अस्य मूलं जातो द्वितीयकर्णो दक्षिणभुजाग्रात्सव्यभुजमूलगामी १००।[8] उक्तक्षेत्रान्तर्गतलघुमहत्त्रिभुजयोः फले १६३८। ४२१२।[9] एतदैक्यं जातं निखिलक्षेत्रफलम् ५८५०। एकदिग्गताबाधान्तराभावे लम्बयोगतुल्य एव द्वितीयकर्णः स्यात्॥ २३३.७॥[10]

इष्टकर्णकल्पनायां विशेषोऽस्ति। तत्र सूत्रम्॥ २३४.०॥

कर्णाश्रिताल्पभुजयोगमि∀तां धरित्रीं J88b
कृत्वावशेषकमितौ च भुजौ प्रसाध्यः।
लम्बस्तथा श्रवण एष विलम्बतोऽल्पो
न स्यात्कथंचिदपरोऽभ्यधिको न भूमेः॥ २३४॥

कल्पनाविषयप्रत्यागतकर्णाश्रितभुजयोगौ पृथग्ज्ञात्वा तत्राल्पभुजयोगमितां भूमिं कृत्वा लम्बः कर्णश्च साध्यः। स कर्णो लम्बादूनः कथंचिदपि न स्यात्तदपरो भूमेरधिको न स्यात्।[11] एवं विचिन्त्य सुधियाभीष्टकर्णः कल्पनीय इति सूत्रस्याभिप्रायः॥ २३४.१॥[12]

अथ क∀र्णे ज्ञाते लम्बज्ञानार्थं लम्बे ज्ञाते कर्णज्ञानार्थं च करणसूत्रं वृत्तद्वयम्॥ २३५.०॥[13] E42a

महीं महीं कर्णभुजौ भुजौ च प्रक∀ल्प्य साध्यः सुधियावलम्बः। J89a
चतुर्भुजान्तस्त्रिभुजे तु लम्बलम्बस्थदोर्वर्गवियोगमूलम्॥ २३५॥
उक्तावधा तद्रहिता धरित्री वर्गीकृता लम्बकवर्गयुक्ता।[14]

---

[1] शत ११७ J ] ∅ E; कल्प्य E ] काल्प J; तमेव J ] तमे ११७ व E; येपि J ] ये E; मिं E ] मि J; आवाधावलंबाः E ] आबा√वलंबा J(with 'dhā' in margin). [2] ज ] जे JE. [3] भुज ] भुजे JE; २१ऽ९६ J ] २१९६ E. [4] त्रन्यासः J ] त्रं E. [5] २८ E ] २८ लं J; ७२ E ] २१। ७२ लं J. [6] दिर् J ] द्दि E; ध J ] प्र E. [7] ग १०० व J ] गव E; १०००० E ] ७५००० J('7' corrected to '1'; '5' deleted). [8] यकर्णो ] यकर्णौ J, यःकर्णो E. [9] योः E ] यो J. [10] र्णः E ] र्णः १०० J. [11] स J ] ∅ E; थं J ] थ E; त्तद J ] त् द E. [12] त्र E ] त्रे J. [13] लंबे E ] लंबेवा J. [14] द्र E ] द्रि J('i' crossed out).

तदीयमूलप्रमितः प्रणीतः कर्णः पुराणैर्गणितप्रवीणैः॥ २३६॥

अत्रोद्देशकः॥ २३७.०॥

शराद्रिचन्द्रा वदनं शतानां षट्कं धरित्री शरशैलरामाः।
सव्यो भुजोऽन्यः खखपञ्च तत्र कर्णौ विलम्बौ च वदाशु मित्र॥ २३७॥[1]

न्यासः।[2]




[चित्र २५]

अत्र सव्यभुजाग्राद्दक्षिणभुजमूलगामिनं कर्णं पञ्चाशीतिसहितपञ्चशतमितं प्रकल्प्य 'इष्टा
J89b श्रुतिः ∀सर्वचतुर्भुजेषु भूमिः प्रकल्प्या' (GM 228ab) इत्यादिना सूत्रेण साधितो द्वितीयकर्णः
५००।[3] एवमेतौ कर्णौ ५८५।५००॥ २३७.१॥[4]

अथ सव्यभुजाग्राद्दक्षिणभुजमूलगामी कर्ण एको भुजः सव्यभुजोऽन्यभुजो भूमिरेव भूमि-
रिति प्रकल्प्य 'भुजान्तरैक्याभिहतिर्' (GM 218a) इत्यादिना साधितोऽवलम्बः ३५१।[5] तथा
E42b दक्षिणभुजाग्रात्सव्यभुजमूलगामी कर्ण ५०० एको भुजो दक्षिणभुजो द्वितीयभु∀जो भूमिरेव
भूमिरिति प्रकल्प्य निरुक्तसूत्रेण साधितोऽवलम्बः ४००॥ २३७.२॥[6]

J90a अथ लम्बात्कर्णः साध्यते।[7] यथा। लम्बः ३५१। अस्य बाहुः ३७५। ∀अनयोर्वर्गौ १२३२०१।
१४०६२५।[8] अन्तरम् १७४२४।[9] अस्य मूलं जाताबाधा १३२।[10] एतदूना भूमिः ४६८। अस्या
वर्गः २१९०२४। लम्बवर्गयुक्तादस्मान्मूलं जातः कर्णः ५८५।[11] अथवा लम्बः ४००। अस्य
भुजः ५००।[12] अनयोर्वर्गौ १६००००। २५००००।[13] अनयोरन्तरस्य मूलमाबाधा ३००।[14] एतदूना
भूः ३००। अस्या वर्गाल्लम्बवर्गयुतान्मूलं जातः कर्णः ५००।[15] तथा क्षेत्रस्य दर्शनम्।[16]

---

[1] वि J ] व E. [2] सः J ] सःक्षेत्रदर्शनं E. [3] तपञ्चशत ] तंपंचशत J, तेषुशती E; जे J ] ∅ E; तीय J ] तीयः E. [4] J has अवधे १०५। ४८० लंवौ १४०। ३६० in the top margin of 89b. These are the lengths of the segments of the two diagonals, which cut each other at a right angle. [5] मूलगा E ] गा J(with 'mūla' in margin); प्र J ] परि E; तो J ] ते E. [6] र्ण ५०० ए J ] र्णए E; धितोव J ] धितो E. [7] लंवा J ] लेवा E. [8] १२३२०१। १४०६२५ E ] १२३२०११११४०६२५ J. [9] अंतरं J ] अनयोरंतर E. [10] अस्य J ] ∅ E. [11] वर्गयुक्तादस्मान् J ] वर्गः १२३२०१ युक्तः ३४२३२५ अस्य E(the initial '3' of '342325' crossed out). [12] अस्य J ] ∅ E. [13] १६००००। २५०००० E ] १६००००१२५०००० J. [14] रस्य J ] रं ९०००० E. [15] स्या E ] स्य J. [16] तथाक्षेत्रस्य J ] ∅ E.




[चित्र २६][1]

॥ २३७.३ ॥

अथवा समलम्बज्ञानार्थं करणसूत्रं वृत्तत्रयम्॥ २३८.०॥[2]

प्रभवति ∀समलम्बे स्वल्पदोर्भूमियोगा- J90b
दलघुभुजमुखैक्यं नाधिकं निश्चयेन।[3]
इह विमुखकुमानं भूमिमानं प्रकल्प्य
निगदितभुजयुग्मं तद्यथावस्थमेव॥ २३८॥[4]
ततः प्रसाध्या अवधावलम्बास्तथावधोनादिमभूकृतिभ्याम्।[5]
विलम्बवर्गौ सहितौ तदीये मूले भवेतां श्रवणप्रमाणे॥ २३९॥[6]
निरुक्तलम्बेन समानमेव समानलम्बद्वितयं प्रदिष्टम्।
लम्बाहतं भूमुखयोगखण्डं फलं स्फुटं वा सुधियावगम्यम्॥ २४०॥[7]

अत्रोद्देशकः॥ २४१.०॥[8]

∀मही महीषुप्रमिता नवेन्दुतुल्यं मुखं खाश्विमितौ भुजौ च।[9] E43a
समानलम्बप्रमितिं च कर्णौ फलं तथा मे वद तत्र ∀मित्र॥ २४१।[10] J91a

न्यासः।[11]




[चित्र २७][12]

[1] क ५८५ J ] ५८५ E; क ५०० J ] ५०० E; लं ३५१ J ] ३५१ E; लं ४०० J ] ४०० E; आ १३२ J ] १३२ E; आ ३०० J ] ३०० E; ∅ (for the base segment) J ] some illegible letters ('271'?) above the base E. [2] वासम J ] समान E; करण J ] ∅ E; त्रं J ] त्र E; त्रयम्॥ E ] त्रयंप्रभवति॥ J. [3] प्रभवति E ] ∅ J(which erroneously places this 'prabhavati' at the end of the introduction); दल E ] दथल J. [4] ल्प्य J ] ल्प्यं E; मे E ] मै J. [5] भूकृ E ] भूत्क J. [6] वि J ] व E; णे J ] णै E. [7] फलंस्फुटं J ] स्फुटंफलं E; सु E ] स्फु J(corrected to 'su'). [8] अ···कः J ] उदाहरणी E. [9] खा E ] षा J. [10] लंब J ] लंव्य E; तत्रमित्र J ] मित्रतत्र E. [11] सः J ] सःदर्शनं E. [12] ∅ J ] two perpendiculars with '12' for each E; ∅ (for the base segments) J ] १६ १९ १६ E.

अत्र मुखोनभूमिं भूमिं भुजावेव भुजौ च प्रकल्प्य क्षेत्रस्य न्यासो विधीयते।[1]




[चित्र २८][2]

'भुजान्तरैक्याभिहतिर्' (GM 218a) इत्यादिसूत्रेण साधिते आबाधे १६ । १६ ।[3] लम्बश्च १२ । अथादिमभूमिः ५१ ।[4] इयमाबाधाभ्यामूना ३५ । ३५ । अनयोर्वर्गौ १२२५ । १२२५ । एतौ लम्बवर्गेणानेन १४४ युक्तौ जातौ १३६९ । १३६९ ।[5] अनयोर्मूले जातौ कर्णौ ३७ । ३७ । तथा क्षेत्रस्य न्यासः ।[6]




[चित्र २९][7]

॥ २४१.१ ॥

J91b अथोक्तवदत्र साधि$^{\forall}$ते त्रिभुजयोः फले ३०६ । ११४ । अनयोरैक्यं जातं सकलक्षेत्रफलम् ४२० । अथवा भूमुखयोगखण्डं ३५ लम्बेनानेन १२ गुणितं जातं क्षेत्रफलम् ४२० ॥ २४१.२ ॥[8]

'लम्बाहतं भूमुखयोगखण्डम्' (GM 240c) इत्यानयनस्योपपत्तिः क्षेत्रस्य खण्डत्रयविभागेन दर्शनीया।[9] यथा।[10]




[चित्र ३०][11]

क्षेत्रस्य खण्डत्रयविभागेन साधितानि क्षेत्रफलानि ९६ । २२८ । ९६ ।[12] एतेषामैक्यं जातं क्षेत्रफलं तदेव ४२० ॥ २४१.३ ॥[13]

E43b अथ कौतूहलेन नियत$^{\forall}$कर्णसाधनेऽपि करणसूत्रमुच्यते ॥ २४२.० ॥[14]

[1] स्य J ] ∅ E; सो J ] सः E; विधीयते J ] ∅ E. [2] ∅ J ] a perpendicular line with '12 E; ∅ (for the base segments) J ] १६ १६ E. [3] आवा E ] बा J. [4] म J ] ∅ E. [5] एतौ J ] अतो E; क्तौ J ] तौ E. [6] तथा J ] ∅ E; स्यन्यासः J ] दर्शनं E. [7] लं १२ (twice) J ] ∅ E; ३७ क. (left) क ३७ (right) J ] ३७ (both) E. [8] नानेन १२ J ] न E; क्षेत्रफलं J ] सूर्वानीतफलतुल्यमेव E. [9] त्तिःक्षे J ] त्तिः॥ क्षे E. [10] यथा J ] ∅ E. [11] ∅ J. [12] क्षेत्र (2nd) J ] ∅ E. [13] ते J ] ∅ E; तं J ] ते E. [14] कौ J ] कु E; रण J ] रणा E.

बाह्वोर्हतिर्मुखमहीहतियुग्गुणोऽयं
कर्णाश्रितत्रिभुजयुग्मभुजावधैक्ये ।
∀भक्ते मिथो गुणकसंगुणिते विधेये J92a
मूले ततोऽपि नियतौ श्रवणौ भवेताम्॥ २४२॥[1]

अत्रोद्देशकः॥ २४३.०॥

मुखं तत्त्वतुल्यं मही खाङ्गसंख्या भुजो दक्षिणे युग्मबाणप्रमाणः ।[2]
तथा सव्यसंज्ञो भुजोऽङ्काग्निमानस्तदा तत्र मित्र प्रचक्ष्वाशु कर्णौ॥ २४३॥[3]

न्यासः ।[4]




[चित्र ३१][5]

अत्र बाह्वोरनयोः ३९। ५२ अभिहतिः २०२८ मुखमहीवधेनानेन १५०० युक्ता जातो
गुणकः ३५२८।[6] अथ यदि सव्यभुजाग्राद्दक्षिणभुजमूलगामी कर्णः कल्पनेष्टो भवति तदा
तदाश्रितभुजाभ्या∀सौ २३४०।१३००।[7] अनयोर्योगः ३६४०।[8] अथैवं दक्षिणभुजाग्रात्सव्यभुज- J92b
मूलगामिकर्णानुसारं भुजाभ्यासौ ३१२०।९७५।[9] अनयोर्योगः ४०९५। एतौ योगौ यथासंख्यं
परस्परभक्तौ पञ्चपञ्चाशदधिकचतुःशत्यापवर्तितौ [९ ८ / ८ ९][10] एतौ पूर्वानीतगुणकेनानेन ३५२८
गुणितौ स्वच्छेदेन विभाजितौ लब्धे ३९६९। ३१३६।[11] अनयोर्मूले ६३। ५६।[12] एतौ
सव्यदक्षिणकर्णौ। तथा क्षे∀त्रस्य न्यासः।[13] E44a




[चित्र ३२][14]

[1] ले E ] लं J. [2] संख्या J ] तुल्या E; णे J ] णो E; बा J ] षा E. [3] र्णौ J ] र्णो E. [4] सः J ] सःक्षेत्रस्य E.
[5] E reverses the figure; the two diagonals J ] ∅ E. [6] योः J ] यो E. [7] द्द E ] द J; र्णः J ] र्ण E;
भ्यासौ E ] भ्यांगुणिते∀सौ J. [8] गः J ] गोयं E. [9] मि E ] क्ष्मि J. [10] [९ ८ / ८ ९] E ] [९ | | ८ / ८ | | ९] J.
[11] पू J ] स E; ३५२८ E ] ३५३८ J; ३९६९। ३१३६ J ] ३९६९३१३६ E. [12] न J ] ने E. [13] स्य J ] ∅ E.
[14] E reverses the figure; ६३ E ] क ६३ J; ५६ E ] क ५६ J.

॥ २४३.१॥

करणसूत्रं वृत्तसप्तकम्॥ २४४.०॥

J93a यथोक्तरीत्या श्रवणावबाधालम्बाः प्रसाध्याः सु∀धियोभयत्र।
विलम्बबाह्वन्तरगावबाधा संध्याह्वया पीठसमाह्वयान्या॥ २४४।[1]
अथान्यलम्बश्रवणाभिनिघ्नौ निरुक्तसंधी परपीठभक्तौ।
विलम्बकर्णाधरखण्डके ते स्यातां विलम्बश्रवणाभियोगात्॥ २४५॥
लम्बौ भूमिगुणौ स्वपीठविहृतौ वंशौ भवेताममू
लम्बाधःशकलेऽथवा कुगुणिते संध्याहृते व्यत्ययात्।
ताभ्यामुक्तवदेव कर्णयुतितो भूसंगतो लम्बक-
स्तल्लम्बोभयतोऽपि भूमिशकले संसाधनीये बुधैः॥ २४६॥
कुखण्डकर्णाधरखण्डघातौ स्वसंधिभक्तौ श्रवणद्वयैक्यात्।
J93b कर्णद्वया∀धःशकले ततोऽन्यत्र्यस्रेषु सुज्ञैरवधादि साध्यम्॥ २४७॥
परविलम्बगुणादपि संधितो निजविलम्बहृताच्च फलं समः।[2]
अपरसंधिसमैक्यमितो हरो हरहृतौ परसंधिसमौ च तौ॥ २४८॥
सर्वसहाघ्नौ भवतोऽवधे ते सूच्या अथो सूच्यवधाभिनिघ्नौ।[3]
उक्तौ भुजौ संधिहृतौ क्रमेण सूचीभुजौ तौ निजमार्गवृद्धौ॥ २४९॥
हाराहृतो भूपरलम्बघातः सूचीविलम्बः समुदाहृतोऽयम्।[4]
E44b एवंप्रकारैर्बहुधानुपातैः क्षेत्रे विचारः क्रियते सुधी∀भिः॥ २५०॥

अत्रोद्देशकः॥ २५१.०॥[5]

J94a यत्राभ्राभ्रकुसायका वसुमती तत्त्वेन्दुद∀स्रा मुखं
सव्यो बाहुरिषुक्षमागुणगुणा अन्यो नखाब्ध्यब्धयः।
कर्णौ कर्णभुजैक्यतोऽवनिगतौ लम्बौ च लम्बश्रवो-
योगात्कर्णविलम्बकाधरदले कर्णैक्यतो लम्बकम्॥ २५१॥[6]
भूखण्डे च वदेतरत्रिभुजजा लम्बावबाधाश्च त-
त्सूचीबाह्ववधावलम्बकमितीरेवं फलं निर्मलम्।[7]
उक्तक्षेत्रविचित्रकुञ्जगणितोद्यन्मञ्जरीमाधुरी-
चातुर्यग्रहणे मधुव्रतगुणग्रामः सखे चेदसि॥ २५२॥[8]

क्षेत्रस्य न्यासः।[9]

---

[1] र J ] रं E; ह्व J ] क E; ठ J ] ट E. [2] तो E ] तौं J. [3] सहा E ] महा J. [4] हा J ] ह E. [5] अ···कः J ] उदाहरणं E. [6] द J ] त E; र्णै J ] र्णे E. [7] धाव E ] धाच J; र्मलं J ] र्मली E. [8] त J ] तं E.
[9] क्षेत्रस्यन्यासः E ] ∅ J.




[चित्र ३३][1]

अत्र नियतकर्णानयनप्रकारेण सव्यदक्षिणकर्णावानीय ततोऽनन्तरं प्रथमसूत्रेण कल्पितत्र्यस्र-
द्वयेऽपि ∀ लम्बाबाधाः साध्यास्तत्र भुजलम्बान्तरगताबाधा संधिसंज्ञा तदपरा पीठसंज्ञा।[2] J94b
तथैतत्सर्वं मुग्धावबोधार्थं लिख्यते।[3] सव्यभुजः ३३१५।[4] तदग्रकर्णः ५३५५। सव्यलम्बः
३२१३। सव्यसंधिः ८१६। सव्यपीठम् ४२८४। एवं दक्षिणभुजः ४४२०।[5] तदग्रकर्णः ४७६०।
दक्षिणलम्बः ३८०८।[6] दक्षिणसंधिः २२४४।[7] दक्षिणपीठम् २८५६॥ २५२.१॥

अथ सव्यलम्बकर्णसम्बन्धाल्लम्बकर्णाधःखण्डे साध्येते।[8] यथा। सव्यसंधिः ८१६। अ∀सौ E45a
दक्षिणलम्बगुणितः ३१०७३२८ दक्षिणकर्णगुणितश्च ३८८४१६०।[9] एतौ दक्षिणपीठेन ∀ भक्तौ J95a
जाते लम्बाधःखण्डकर्णाधःखण्डे लं. खं. १०८८ क. खं. १३६०।[10] एवं दक्षिणसंधिः २२४४।
अयं सव्यलम्बतदग्रकर्णाभ्यां गुणितः ७२०९९७२। १२०१६६२०।[11] सव्यपीठेन भक्तौ जाते
दक्षिणलम्बाधःखण्डकर्णाधःखण्डे लं. खं. १६८३। क. खं. २८०५॥ २५२.२॥[12]

अथ सव्यदक्षिणलम्बावेतौ ३२१३। ३८०८ भूमिगुणितौ जातौ १६३८६३००। १९४२०८००।
सव्यदक्षिणपीठाभ्यामाभ्यां ४२८४। २८५६ भक्तौ जातौ वंशौ ३८२५। ६८००।[13] अथवा
वैलोम्येन लम्बाधःखण्डे १६८३। १०८८।[14] ∀ एते भूमिगुणे जाते ८५८३३००। ५५४८८००।[15] J95b
स्वसंधिभ्यामाभ्यां क्रमेण २२४४। ८१६ भक्ते जातौ तावेव वंशौ ३८२५। ६८००।[16] आभ्यां
'वंशाभ्यासे वंशयोगेन भक्ते' (GM 214a) इत्यादिना लम्बकुखण्डसाधनम्।[17] यथा। वंशाभ्यासः
२६०१००००। वंशयोगेनाप्तो जातः कर्णैक्यादधोलम्बः २४४८।[18] 'भूघ्नौ वंशौ वंशयोगेन भक्तौ'
(GM 214c) इति जाते समनन्तरसाधितलम्बोभयतःकुखण्डप्रमाणे १८३६। ३२६४॥ २५२.३॥[19]

अथैते कुखण्डे कर्णाधरखण्डाभ्यामाभ्यां १३६०। २८०५ गुणिते २४९६९६०। ९१५५∀५२०। J96a
एते स्वसंधिभ्यामाभ्यां ८१६। २२४४ भक्ते जाते कर्णद्वयैक्यतः कर्णाधःखण्डे स. क. खं. ३०६०।
द. क. खं. ४०८०।[20] अतो विमलबुद्धिभिस्त्र्यस्रान्त∀रेऽपि लम्बाबाधाः साधयितुं सुकरा E45b

---

[1] ∅ J. [2] क्षिण E ] क्षिणा J. [3] थैत J ] थै E. [4] जः E ] ज J. [5] ण J ] णो E. [6] द J ] ∅ E.
[7] सं J ] सी E. [8] व्य J ] ख्य E. [9] तः E ] त J. [10] क्तौ E ] क्तो J; क. J ] कं. E. [11] र्णा J ] र्ण E.
[12] क्तौ ] क्तो J, क्ते E; लंखं E ] ∅ J; कखं E ] ∅ J. [13] क्तौ J ] क्तो E. [14] अ··· १०८८। J ] ∅ E(here begins a haplological omission caused by '6800'). [15] ए··· ५५४८८००। J ] ∅ E. [16] स्व··· ६८००। J ] ∅ E (here ends the omission). [17] आ···भ्या J ] अभ्या E; दि E ] दी J('i' of 'di' is crossed out and 'ī' is added to the 'da'). [18] प्तो J ] त्तो E. [19] श E ] शा J; धित J ] धिते E; तः···णे J ] तोभूमिखंडे E; १८३६ E ] १८ऽ३६ J. [20] ३०६० E ] ३६० J.

एव।[1] तास्तु विस्तरसंभीत्या नेह लिखिताः।[2] नायमर्थो भास्कराचार्यैरपि विस्तार्योक्तः।[3]




[चित्र ३४][4]

॥ २५२.४ ॥

अथ सूच्यवधादिसाधनम्। अत्र किलायं लम्बः ३२१३। अस्य संधिः ८१६। अयं परलम्बगुणितः ३१०७३२८।[5] असौ निजलम्बहृतः सप्तपञ्चाशदधिकशतत्रयापवर्तितो जातः

J96b समः [6] | ८७०४ / १ | अ∀स्य परसंधेश्च २२४४ योगे जातो हारः[7] ॥ २८९०० ॥ [8] अथ समपरसंधी भूमिगुणौ जातौ स.[9] ॥ ४४३९०४०० ॥ [10] परसं.[11] ‖ ११४४४४०० ‖ एतौ 'लवहरौ परिवर्त्य' (GM 43c) इत्यादिना हारहृतौ जाते सूच्याबाधे १५३६। ३५६४ ॥ २५२.५ ॥

E46a अथ भुजौ सूच्याबाधागुणितौ ∀ ५०९१८४०। १५७५२८८०। निजसंधिभ्यामाभ्यां ८१६। २२४४ भक्तौ जातौ सूचीभुजौ ६२४०। ७०२०। परलम्बो भूमिगुणः १९४२०८००। अयं हारहृतो जातः सूचीलम्बः ६०४८। अथवात्रायं लम्बः ३८०८।[12] अस्य संधिः २२४४। अयं

J97a परलम्बे∀ नानेन ३२१३ गुणितः ७२०९९७२ स्वलम्बहृतो रसाद्रिवेदैरपवर्तितो जातः समः[13] ॥ १५११४७ / ८ ॥ [14] अस्य परसंधेश्च ८१६ योगो जातो हारः[15] ॥ २१६७५ / ८ ॥ [16] परसंधिसमौ भूमि-

---

[1] तु J ] तं E. [2] सं J ] ∅ E. [3] र्थोभा J ] र्थोऽभा E; रपिवि J ] र्वि E; स्ता J ] स्ती E. [4] ∅ J. In E it occupies nearly half of fol. 45b. ३०६० ] ∅ E; ४०८० ] ∅ E; पी २८५६ ] पीठ २८५१ E(in the bottom right corner); १८३६ ] १८५६ E. [5] णितः J ] णः E. [6] मः J ] म E. [7] २२४४ J ] ∅ E; तो E ] तः J(corrected). [8] ॥ २८९०० ॥ J ] | २८९०० / ९ | E. [9] संधी J ] सं। धी E; स (for स. ) J ] ∅ E. [10] ॥ ४४३९०४०० ॥ J ] | ४४३९०४०० / ९ | E. [11] सं. E(without a period) ] संधी J. [12] लंबः J ] लंवः E. [13] मः J ] म E. [14] ॥ १५११४७ / ८ ॥ J ] | १५११४७ / ८ | E. [15] रः J ] र E. [16] ॥ २१६७५ / ८ ॥ J ] | २१६७५ / ८ | E.

गुणौ ॥ ४१६१६००॥ ७७२४९$_{८}$७००॥ [1] एतौ हारहृतौ जाते ते एव सूच्याबाधे १५३६ । ३५६४ ।[2]
आ∀भ्यां सूचीभुजसाधनं प्राक्प्रतिपादितमेव। परलम्बो भूमिगुणः १६३८६३०० ।[3] अयं हारहृतो E46b
जातः सूचीलम्बः स एव ६०४८ । यथोक्तवत्क्षेत्रफलम् १२७४४९०० ।[4]




[चित्र ३५ ][5]

॥ २५२.६ ॥

अत्र क्षेत्रक्षोदेऽनुपाताः सुगमा एव तथापि मुग्धावबोधार्थं कतिचित्प्रदर्श्यन्ते ।[6] यथा। यदि
दक्षिणपीठेनाने∀न २८५६ एतौ दक्षिणलम्बकर्णौ लं. ३८०८ । क. ४७६० तदा रूपमितेनेष्टेन १ J97b
किमिति जातौ रूपस्य लम्बकर्णौ यथासम्भवमपवर्तितौ लं. $\frac{४}{३}$ क. $\frac{५}{३}$ [7] लघुक्षेत्रस्यास्य
न्यासः ।[8]

---

[1] ॥ ४१६१६००॥ ७७२४९$_{८}$७००॥ J ] ४१६१६००॥ ७७२४९$_{८}$७०० E. [2] एतौ J ] एतो E; १५३६॥ ३५६४ E ] १५३६ऽ३५६४ J. [3] णः J ] णौजातः E. [4] १२७४४९०० E ] ५१२७४४९०० J. [5] ६२४० E ] सूचीभुज ६२४० J; ६०४८ E ] सूचीलंव ६०४८ J; ७०२० E ] सूचीभुज ७०२० J; ३८२५ E ] ३८२५ वं J; २१२५ E ] मु २१२५ J; ६८०० E ] वं ६८०० J; ५३५५ E ] क. ५३५५ J; ४७६० E ] क. ४७६० J; ३२१३ E ] लं ३२१३ J; ३८०८ E ] लं ३८०८ J; ३३१५ E ] सव्यभु. ३३१५ J; ४४२० E ] द. भु. ४४२० J; १३६० E ] १३६० क. अ. खं. J; २८०५ E ] क. अ. खं. २८०५ J; १०८८ E ] लंअ. १०८८ J; २४४८ E ] लं २४४८ J; १६८३ E ] लंअ. १६८३ J; ८१६ ] ८१६ सं. J, सं ८१६ E; ४२८४ ] स. पी. ४२८४ J, पी (?) ४२८४ E; २८५६ ] द. पी. २८५६ J, पी (?) २८५६ E; २२४४ ] सं. २२४४ J, सं २२४४ E; १८३६ ] कु. खं. १८३६ J, कुखं १८५६ E; ३२६४ ] कु. खं. ३२६४ J, कुखं ३२६४ E; १५३६ ] सूच्यावाधा १५३६ J, सूआ १५३६ E; ३५६४ ] सूच्यावाधा ३५६४ J, सूआ ३५६४ E; ५१०० ] भूः ५१०० J, भू ५१०० E; १२७४४९०० ] क्षेत्रफलम् १५४२२४०० J(cf. GM 252.9), ∅ E. [6] र्श्यंते J ] र्श्यंतै E. [7] ने J ] ∅ E; मप J ] भय E; लं. $\frac{४}{३}$ क. $\frac{५}{३}$ J ] लं $\frac{४}{३}$ क $\frac{५}{३}$ E. [8] अस्य J ] ∅ E.




[चित्र ३६ ][1]

J98a अथान्योऽनुपातः। यदि रूपमितेनेष्टेन १ रूप १ मितो गुणस्तदा ∀सव्यसंधिना किमिति जातो गुणः संधितुल्य एव ८१६ ।[2] अनेन गुणकेन गुणितस्य लघुक्षेत्रस्य न्यासः।




[चित्र ३७ ]

अस्य कोटिकर्णतुल्ये एव सव्यलम्बाधःखण्डकर्णाधःखण्डे वेदितव्ये। एवं सव्यपीठतोऽप्यनुपातेन दक्षिणलम्बाधःखण्डकर्णाधःखण्डे भवतः। एवमुक्तानुपाताकूतान्तर्गता करणसूत्रस्यापि वासना॥ २५२.७॥[3]

E47a अथ कर्णयोगादधोलम्बादिज्ञानार्थमनुपाताः।[4] य∀दि सव्यलम्बेनानेन ३२१३ कर्णाश्रिताबाधाकर्णावेतौ आ. ४२८४ क. ५३५५ तदा रूपेण किमिति जातौ रूपस्याबाधाकर्णावपवर्तितौ आ.
J98b | ४ / ३ | क. | ५ / ३ |[5] ∀पुनर्यदि लम्बेन ३८०८ एतौ कर्णाश्रिताबाधाकर्णौ आ. २८५६ क. ४७६० तदा रुपेण किमिति जातावपवर्तितौ रूपस्याबाधाकर्णौ[6] आ. | ३ / ४ | क. | ५ / ४ |[7] एवमनयोर्लघुक्षेत्रयोः कर्णावेव भुजावाबाधायोगमितां भुवं रूपतुल्यं लम्बं कृत्वैकीकृतस्य क्षेत्रस्य न्यासः।[8]




[चित्र ३८ ]

अथान्योऽनुपातः। यद्यनया भुवा | २५ / १२ | रूपं गुणः १ तदा प्रकृतभुवानया ५१०० किमिति

---

[1] ५/३ E ] ३५ J. [2] ने J ] ∅ E; १ मि···स्त J ] मितोगुणः १ त E; णःसंधि E ] णः॥ संधि J. [3] र्गता J ] र्गत E. [4] ताः J ] तः E. [5] आ. | ४ / ३ | क. | ५ / ३ | J ] आ | ४ / ३ | क ५ / ३ | E. [6] पुनर्यदिलं J ] यदिपुनर्लं E; श्रिता J ] श्रितौरूपस्या E(‘tau’ corrected to ‘tā’ and ‘rūpasyā’ crossed out); आ···र्णौ E ] ∅ J. [7] आ. | ३ / ४ | क. | ५ / ४ | J ] | आ ३ / ४ | क ५ / ४ | E. [8] न E ] भ J; बा J ] ∅ E; त्वै J ] त्वे E.

जातो गुणः २४४८।[1] अनेन गुणकेन गुणितमेकीकृतलघुक्षेत्रं जातं कर्णयोगादधरत्र्यस्रम्।[2] न्यासः।[3]




[चित्र ३९]

पूर्वानीते लघुक्षेत्राबाधे गुणेनानेन २४४८ गुणिते जाते अस्मिन्महति क्षेत्र आबाधे १८३६। ३२६४॥ २५२.८॥[4]

अथ सूच्याबाधादिज्ञानार्थमनुपातः। यदि ल∀म्बेनानेन ३२१३ आबाधेयं ८१६ तदा रूपमितेन J99a
१ लम्बेन किम्।[5] जाताबाधापवर्तिता $\boxed{\begin{matrix}१६\\६३\end{matrix}}$ पुनर्यदि लम्बेनानेन ३८०८ आबाधेयं २२४४ तदा रूपमितेन ∀लम्बेन १ किमिति जातान्याबाधापवर्तिता[6] $\boxed{\begin{matrix}३३\\५६\end{matrix}}$[7] पुनर्यदि लम्बेनानेन ३२१३ E47b
भुजोऽयं ३३१५ तदा रूपेण किम्।[8] जातो भुजोऽपवर्तितः $\boxed{\begin{matrix}६५\\६३\end{matrix}}$[9] पुनर्यदि लम्बेनानेन ३८०८ भुजोऽयं ४४२० तदा रूपेण किमिति जातो भुजोऽन्यो भुजोऽपवर्तितः[10] $\boxed{\begin{matrix}६५\\५६\end{matrix}}$[11] अथ क्षेत्रस्य न्यासः।




[चित्र ४०][12]

अत्राबाधायोगो जाता भूमिः $\boxed{\begin{matrix}४२५\\५०४\end{matrix}}$ अथान्योऽनुपातः। यद्यनया भुवा $\boxed{\begin{matrix}४२५\\५०४\end{matrix}}$ गुणको रूपं १ तदा प्रकृतभुवान∀या ५१०० किमिति जातो गुणकारः ६०४८।[13] अनेन गुणकेन गुणितं J99b
लघुसूचीक्षेत्रं जातं प्रकृतसूचीक्षेत्रम्।

---

[1] $\boxed{\begin{matrix}२५\\१२\end{matrix}}$ J ] ∅ E; कृत E ] कृ J; ति E ] ∅ J. [2] रत्र्यस्रं J ] स्त्रिभुजं E. [3] न्यासः J ] न्या॰ E. [4] नीते J ] नीत E; २४४८ ] ∅ JE; जा J ] अजा E(‘a’ crossed out); क्षेत्र ] क्षे J, क्षेत्रे E; ३२६४ E ] ∅ J. [5] १ J ] ∅ E. [6] लंवेन १ J ] ∅ E. [7] $\boxed{\begin{matrix}३३\\५६\end{matrix}}$ J ] $\boxed{\begin{matrix}३३\\५८\end{matrix}}$ E. [8] किं J ] किमिति E. [9] $\boxed{\begin{matrix}६५\\६३\end{matrix}}$ E ] $\boxed{\begin{matrix}६५\\६५\end{matrix}}$ J. [10] भुजो (2nd) J ] ∅ E. [11] $\boxed{\begin{matrix}६५\\५६\end{matrix}}$ E ] $\boxed{\begin{matrix}६५\\६५\end{matrix}}$ J. [12] E reverses this figure; १ E ] ∅ J; the denominator for ‘16’ in E is illegible; E has illegibe letters (‘11’?) between ‘33’ and ‘16’. [13] द्य E ] द J; को E ] के J; नया ५१०० J ] ∅ E.




[चित्र ४१]

अत्र फलम् १५४२२४००॥ २५२.९ ॥[1]

करणसूत्रं वृत्तद्वयम्॥ २५३.०॥

व्यासोऽभ्रपूर्णाङ्ग ६०० हतो विभक्तो भूनन्दचन्द्रैः १९१ परिधिः स्फुटः स्यात्।
व्यासोऽपि साध्यः परिधेः सकाशात्तथा गुणच्छेदविपर्ययेण॥ २५३॥[2]
व्यासोऽथवा रामगुणो निजैकविंशांश २१ युक्तः परिधिः सुखार्थम्।[3]
भवेदसौ स्वाकृति २२ भागहीनो रामैर्हृतो व्यासमितिस्तथैव॥ २५४॥[4]

अत्रोद्देशकः॥ २५५.०॥[5]

यत्र व्यासमितिः सप्तक्रमराममही १३३७ मिता।[6]
J100a तत्र मे परिधिं ब्रूहि विष्क∀म्भं परिधेरपि॥ २५५॥[7]

न्यासः।




[चित्र ४२][8]

E48a अत्रायं व्यासः १३३७ खखाङ्ग ६०० गुणितः ∀८०२२०० भूनन्दचन्द्रै १९१ र्विभक्तो जातः परिधिः ४२००।[9] अयं सूक्ष्मः।[10] अथवा व्यासः १३३७ रामगुणितः ४०११ निजैकविंशांशयुक्तो जातः परिधिः ४२०२।[11] अयमसूक्ष्मः।[12] अत उक्तं 'सुखार्थम्' (GM 254b) इति॥ २५५.१॥

---

[1] अ···४००॥ J ] ∅ E. [2] था J ] दा E; र्य J ] र्यें E. [3] म J ] म ३ E; २१ J ] ∅ E. [4] २२ ···नो J ] भागहीनो २२ E; र्ह J ] हृ E. [5] अ···कः J ] उदाहरणं E. [6] क्रमराम E ] अ¯मरा J; १३३७ J ] ∅ E. [7] धिं J ] धि E; ष्कम्भं ] ष्कंकभं J('ka' without *mātrā* line), ष्वंभं E. [8] ∅ (circumference) J ] ४२०० E. [9] ६०० J ] ∅ E; र्वि··· ४२०० J('vi' for 'rvi') ] ∅ E(here begins an omission). [10] अयंसूक्ष्मः J ] ∅ E. [11] अ···शांश ] ∅ J(here begins a haplological omission caused by 'sūkṣmaḥ')E(here ends the omission); यु··· ४२०२ E ] ∅ J. [12] अयमसूक्ष्मः E ] ∅ J(here ends the omission).

अत्र परिधिः ४२००। अयं 'गुणच्छेदविपर्ययेण' (GM 253d) इत्युक्तत्वाङ्गूनन्दचन्द्रै १९१ र्गुणितो जातः ८०२२००।[1] अभ्रपूर्णाङ्कैः ६०० र्भक्तो लब्धो व्यासः १३३७।[2] अथवा स्थूलपरिधिः ४२०२। असौ स्वद्वाविंशत्यंशेनानेन १९१ हीनः ४०११।[3] त्रिभि ३ र्भक्तो जातो व्यासः १३३७॥ २५५.२॥[4]

करणसूत्रं वृत्तम्॥ २५६.०॥[5]

कृतीकृतव्यासमितिः खबाणवसुन्धरा १५० संगुणिता विभक्ता।
वसुन्धरानन्दवसुन्धराभिः १९१ परिस्फुटं तद्वलये फलं स्यात्॥ २५६॥

अत्रोदाहरणम्॥ २५७.०॥

